**अक्षद्यूत** न० अक्षैर्द्यूतम् ३त० । पाशकादिक्रीड़ायाम् ।

**अक्षद्यूतादि** पु० ब०। "निर्वृत्तेऽक्षद्यूतादिभ्य" इति पाणिन्युक्ते ठक्प्रत्ययनिमित्ते शब्दसमूहे । अक्षद्यूत, जानुप्रहृत-जङ्घाप्रहृत जङ्घाप्रहृत, पादस्वेदन, कण्टकमर्द्दन, गतानुगत, गतागत-यातोपयात, अनुगत इति । अक्षद्यूतेन निर्वृत्तम् आक्षद्यूतिकं वैरमित्यादि ।

**अक्षधर** पु० अक्षं चक्रं रथावयवं तत्कीलकमिव कण्टकं वा धरति धृ-अच् ६त० । विष्णौ चक्रे शाखोटकवृक्षे च चक्रधारकमात्रे त्रि० । [समा०। चक्राग्रे चक्रभारे च ।

**अक्षधुर्** स्त्री० अक्षस्य चक्रस्य धूरग्रं भारोवा ६त० न अ

**अक्षधूर्त्त** त्रि० अक्षे तद्देवने धूर्त्तः । द्यूतकुशले द्यूतकारिणि च (जुयारि)। [शकटवाहनकर्त्तरि वृषे ।

**अक्षधूर्त्तिल** पु० अक्षस्य शकटस्य धूर्त्तिं भारं लाति ला-क ।

**अक्षन्** न० अक्ष-बाहु० कनिन् । नेत्रे "दक्षिणेऽक्षन् इति वृह० उप० "भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा" इति वेदः ।

**अक्ष(क्षि)पटल** न० अक्ष्णः नेत्रस्य पटलमिवाच्छादकत्वात् । नेत्रस्यावरके कोशभेदे नेत्ररोगभेदे (छानि) च । पटलस्थरोगभेदादि शुश्रुते उक्तं यथा

"मसूरदलमात्रान्तु पञ्चभूतप्रसादजाम् । खद्योतविस्फुलिङ्गाभां सिद्धां तेजोभिरव्ययैः ॥ आवृतां पटलेनाक्ष्णोर्वाह्येन विवराकृतिम् । शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिन्तकाः ॥ रोगांस्तदाश्रयान् घोरान् षट् च षट् च प्रचक्ष्महे । पटलानुप्रविष्टस्य तिमिरस्य च लक्षणम् ॥ शिराभिरभिसम्प्राप्य विगुणोऽभ्यन्तरे भृशम् । प्रथमे पटले दोषो यस्य दृष्टौ व्यवस्थितः ॥ अव्यक्तानि स रूपाणि सर्व्वाण्येव प्रपश्यति । दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते । मक्षिकाः मशकान् केशान् जालकानि च पश्यति । मण्डलानि पताकाश्च मरीचीः कुण्डलानि च ॥ परिप्लवांश्च विविधान् वर्षमभ्रं तमांसि वा । दूरस्थान्यपि रूपाणि मन्यते च समीपतः ॥ समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात् । यत्नवानपि चात्यर्थं सूचीपाशं न पश्यति ॥ ऊर्द्ध्वं पश्यति नाधस्तात्तृतीयं पटलं गते । महान्त्यपि च रूपाणि च्छादितानीव वाससा ॥ कर्णनासाक्षियुक्तानि विपरीतानि वीक्षते ॥ यथादोषञ्च रज्येत दृष्टिर्दोषे बलीयसि ॥ अधःस्थिते समीपस्थं दूरस्थञ्चोपरिस्थिते । पार्श्वस्थिते तथा दोषे ऽपार्श्वस्थानीव पश्यति ॥ समन्ततः स्थिते दोषे सङ्कुलानीव पश्यति। दृष्टिमध्यगते दोषे स एकं मन्यते द्विधा ॥ द्विधास्थिते त्रिधा पश्येद्बहुधा चानवस्थिते। तिमिराख्यः स वै दोषश्चतुर्थपटलङ्गतः ॥ रुणद्धि सर्वतो दृष्टिं लिङ्गनाशः स उच्यते। तस्मिन्नपि तमोभूते नातिरूढे महागदे ॥ चन्द्रादित्यौ सनक्षत्रावन्तरिक्षे च विद्युतः । निर्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ॥ स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः" इति ।

अक्षाणां व्यवहाराणां पटलमस्त्यस्य अच् ६त० । अक्षदर्शके धर्म्माध्यक्षे पु० ।

**अक्षपरि** अव्य० अक्षेण पाशकेन विपरीतं वृत्तम् । अक्षशलाकेत्यादिना परिणा अव्य० । पाशकक्रीड़ायां यथा गुटिकापाते जयोभवति तद्विपरीतपातने ।

**अक्षपाटक** पु० अक्षे व्यवहारे पाटयति दीप्यते पट दीप्तौ-ण्वुल् । व्यवहारनिर्णेतरि धर्म्माध्यक्षे ।

**अक्षपाद** पु० अक्षं नेत्रं दर्शनसाधनतया जातः पादोऽस्य । न्यायसूत्रकारके गौतमे मुनौ, स हि स्वमतदूषकस्य व्यासस्य मुखदर्शनं चक्षुषा न कर्त्तव्यमिति प्रतिज्ञाय पश्चात् व्यासेन प्रसादितः पादे नेत्रं प्रकाश्य तं दृष्टवानिति पौराणिकी कथा । "अक्षपादप्रणीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोऽर्थ इति" पद्मपुराणम् ।

**अक्षपीड़ा** स्त्री० अक्षमिन्द्रियं रसनारूपं पीड़यति आस्वादनात् पीड-अच् । यवतिक्तालतायाम्। पीड-भावे अङ्+ ६त० । इन्द्रियपीडायाम् ।

**अक्षम** त्रि० न क्षमते क्षम-अच् न० त० । असमर्थे । क्षम-भावे अङ् अभावार्थे न० त० । क्षमाभावे ईर्ष्यायाम् स्त्री । "अक्षमा भवतः केयमिति" भारतम् । न०ब० । क्षमारहिते त्रि० ।

**अक्षमाला** स्त्री अक्षाणां रुद्राक्षाणां माला । रुद्राक्षवीजग्रथितमालायाम् । अकारादिक्षकारान्तः अक्ष स्तत्कृता तत्प्रतिनिधीभूता वा माला शा० त० । एकपञ्चाशद्वर्णमालायाम् तत्प्रतिनिधीभूतायां स्फटिकादिग्रथितायाम् वाह्यमालायाञ्च "शोष्यमाणपुष्करवीजं ग्रथ्यमनाक्षमालमिति" काद० । "विभान्तमच्छस्फटिकाक्षमालयेति" माघः । तद्विवरणम् । "क्रमोत्क्रमगते माला मातृकार्णैः क्षमेरुके । लावसानैः साष्टवर्गैरन्तर्यजनकर्म्मणीति" सनत्कुमारीये । "पद्मवीजादिभिर्माला वहिर्यागे शृणुष्व ताः । रुद्राक्षशङ्खपद्माक्षपुत्रजीवकमौक्तिकैः । स्फाटिकैर्मणिरत्नैश्च सुवर्णैर्विद्रुमैस्तथा । रजतैः कुशमूलैश्च गृहस्थस्याक्षमालिकेति" तन्त्रसारे एतत्विस्तारस्तत एवागन्तव्यः । अक्षस्य